श्री अष्टलक्ष्मी संपत्प्रद स्तवः

अथ संपत्प्रदस्तवः ।

प्रत्यूहद्ध्वांतचंडांशुः प्रत्यूहारण्यपावकः ।
प्रत्यूहसिह्मशरभः पातु नः पार्वतीसुतः ॥

चित्सभानायकं वंदे चिंताधिकफलप्रदं ।
अपर्णास्वर्ण कुंभाभ कुचाश्लिष्टकलेवरं ॥1॥

विराड्हृदय पद्मस्थत्रिकोणेशिवयासह ।
सयोनः कुरुतेलास्यमष्टलक्ष्मीः प्रयच्छतु ॥2॥

श्रुतिस्तंभांतरेचक्र युग्मेगिरिजयासह ।
सयोनः कुरुतेलास्यमष्टलक्ष्मीः प्रयच्छतु ॥3॥

शिवकामीकुचांभोज सव्यभागविराजितः ।
सयोनः कुरुतेलास्यमष्टलक्ष्मीः प्रयच्छतु ॥4॥

करस्थ डमरुध्वान परिष्कृतरवागमः ।
सयोनः कुरुतेलास्यमष्टलक्ष्मीः प्रयच्छतु ॥5॥

नारदब्रह्म गोविंद वीणाताल मृदंगकैः ।
सयोनः कुरुतेलास्यमष्टलक्ष्मीः प्रयच्छतु ॥6॥

जैमिनि व्याघ्रपाच्छेषस्तु तिस्मेरमुखांबुजः ।
सयोनः कुरुतेलास्यमष्टलक्ष्मीः प्रयच्छतु ॥7॥

तिल्वविप्रैस्त्रयी मार्ग पूजितांघ्रिसरोरुहः
सयोनः कुरुतेलास्यमष्टलक्ष्मीः प्रयच्छतु ॥8॥

मंत्रनूपुर पद्पद्म झणज्झणि तदिंद्मुखः ।
सयोनः कुरुतेलास्यमष्टलक्ष्मीः प्रयच्छतु ॥9॥

संपत्प्रदमिदं स्तोत्रं प्रातरुत्थाय यः पठेत् ।
अचलां श्रियमाप्नोति नटराजप्रसादतः ॥10॥

इति अष्टलक्ष्मीसंप्रत्प्रदस्तवः ।